## गर्हायां च। (१४९/२८०६)

अनवक्लृप्त्यमर्षयोः इति निवृत्तम्। गर्हा, निन्दा, कुत्सा इत्यनर्थान्तरम्। यच्च यत्र [1]इत्येतयोः [2]उपपदयोर्धातोः लिङ् प्रत्ययो भवति गर्हायां गम्यमानायाम्। सर्वलकाराणामपवादः। यच्च तत्रभवान् वृषलं याजयेत्, यत्र तत्रभवान् वृषलं याजयेद ऋद्धो [3]वृद्धः सन् ब्राह्मणः, गर्हामहे, [4]अहो अन्याय्यमेतत्। क्रियातिपत्तौ यथायथं लृङ् भवति॥

## चित्रीकरणे च। (१५०/२८०७)

[5]यच्चयत्रयोः इत्येव। चित्रीकरणम् आश्चर्यम्, अद्‌भुतम्, [6]विस्मयनीयम्। यच्चयत्रयोः उपपदयोः चित्रीकरणे गम्यमाने धातोः लिङ् [7]प्रत्ययो भवति। सर्वलकाराणामपवादः। यच्च तत्रभवान् वृषलं याजयेत्, यत्र तत्रभवान् वृषलं याजयेत्, आश्चर्यमेतत्। क्रियातिपत्तौ यथायथं लृङ् भवति॥

## शेषे लृडयदौ। (१५१/२८०८)

यच्चयत्राभ्यामन्यत्र [8]चित्रीकरणं शेषः। शेषे उपपदे चित्रीकरणे गम्यमाने धातोः लृट् प्रत्ययो भवति, यदिशब्दश्चेन्न प्रयुज्यते। सर्वलकाराणामपवादः। आश्चर्यम्, [9]चित्रम् अद्‌भुतम्, अन्धो नाम पर्वतमारोक्ष्यति, बधिरो नाम व्याकरणमध्येष्यते। अयदौ इति किम्? आश्चर्यं यदि स भुञ्जीत, [10]यदि सोऽधीयीत। लिङ्‌निमित्ताभावात् इह लृङ् न भवति॥

## उताप्योः समर्थयोर्लिङ्। (१५२/२८०९)

उत अपि इत्येतयोः [11]समर्थयोः धातोः लिङ् प्रत्ययो भवति। सर्वलकाराणामपवादः। बाढम् इत्यस्मिन्नर्थे समानार्थत्वमनयोः। उत कुर्यात्। अपि कुर्यात्। उताधीयीत। अप्यधीयीत। बाढमध्येष्यते इत्यर्थः। समर्थयोः इति किम्? उत दण्डः पतिष्यति? अपि द्वारं धास्यति। प्रश्नः प्रच्छादनं च [12]गम्यते[13]। 'वोताप्योः (३.३.१४१/२७९८) इति विकल्पो निवृत्तः। इतः प्रभृति भूते[14]ऽपि लिङ्‌निमित्ते क्रियातिपत्तौ नित्यं लृङ्। भविष्यति तु सर्वत्रैव [15]नित्यः॥

## कामप्रवेदनेऽकच्चिति। (१५३/२८१०)

स्वाभिप्रायाविष्करणम् कामप्रवेदनम्। कामः, इच्छा, अभिलाषः [16]इत्यनर्थान्तरम्। तस्य प्रवेदनम् प्रकाशनम्। तस्मिन् गम्यमाने अकच्चिति उपपदे धातोर्लिङ् प्रत्ययो भवति। सर्वलकाराणामपवादः। कामो मे भुञ्जीत भवान्। अभिलाषो मे भुञ्जीत भवान्[17]। अकच्चिति इति किम्?

कच्चिज्जीवति [18]ते माता कच्चिज्जीवति [19]ते पिता।
[20]माराविद त्वां पृच्छामि कच्चिज्जीवति पार्वती॥

---

1. इति गर्हायां गम्यमानायां लिङ् प्रत्ययो भवति फ.ह. 2. उपपदयोः नास्ति फ. 3. विद्वान् फ. 4. अहो नास्ति फ. 5. वाक्यमिदं नास्ति फ. 6. विस्मयः क.ह. 7. प्रत्ययः नास्ति ब.फ. 8. चित्रीकरणं नास्ति फ.ह. 9. विचित्रम् अ. 10. चित्रम् इत्यधिकम् क.फ.ह. 11. समानार्थयोः उपपदयोः फ. 12. यथा सङ्ख्यम् फ. 13. यथासङ्ख्येन इत्यधिकम् ह. 14. अपि नास्ति फ. 15. नित्यम् क. 16. इत्यर्थान्तरम् अ. 17. श्रद्धा मे भुञ्जीत भवान् इत्यधिकम् ह. 18, 19. मे अ.फ. 20. मातापितरौ पृच्छामि ह.